# ब्रह्मानन्दस्वामिना सङ्कलितः श्रीश्रीरामकृष्णोपदेशः

## ब्रह्मचारिणा शुभदीपेन† अनूदितः

### विषयः - जीवस्य अवस्थाभेदः

१. मनुष्यः— यथा उपाधानानाम् आवरणम्; तेषां बहिर्भागे केचन वर्णेन रक्ताः, केचन कृष्णाः; परन्तु अन्तः सर्वेषां कार्पासः समान एव। केचन जनाः सुन्दराः दृश्यन्ते; केचन कृष्णवर्णीयाः सन्ति; केचन साधवः, केचन असाधवः; किन्तु स एकः एव ईश्वरः सर्वेषु विराजते।

२. संसारे जनानां स्वभावः द्विविधः इति परिलक्ष्यते— केचित् स्वभावतः शूर्पसदृशा अपरे केचन चालनीसदृशाः । यथा शूर्पः कूर्चादिकं सर्वं निष्प्रयोजनं त्यक्त्वा, धान्यादिकं सारभूतम् अंशं च स्वस्य अन्तः धारयति। तथा केचन जनाः संसारस्य साररहितानि वस्तूनि (कामकाञ्चनादीनि) सर्वाणि परत्यज्य, जगतः सारभूतं भगवन्तम् एव स्वीकुर्वन्ति। यथा चालनी सर्ववस्तूनि परित्यज्य निरर्थकवस्तूनि स्वयमेव धारयति। तथा जगति केचन जनाः सारभूतम् ईश्वरं त्यक्त्वा, कामकाञ्चनादि-निरर्थकवस्तूनि गृह्णन्ति ।

३. विषयजनानां मनः शकृत्कीटवत् भवति। गोमयोत्थाः कीटाः गोमयस्य अन्तः वसितुम् इच्छन्ति। यदि तान् गोमयात् परं किमपि ददति, तर्हि तेभ्यः न रोचते। यदि बलपूर्वकं तान् कमलस्य अन्तः उपावेश्यते तर्हि ते म्रियन्ते। विषयासक्तजनानां मनः तथैव। विषयकथां विना अन्यत् किमपि न रोचते। यदि कुत्रचिद् ईश्वरीयवार्ताः प्रवृत्ताः सन्ति, तर्हि ते तत्स्थानं परित्यज्य यत्र जल्पनं भवति तत्र गत्वा तिष्ठन्ति।

४. यथा— केचन मत्स्याः जाले गृहीताः पलायितुं न प्रयतन्ते, ते तत्रैव तिष्ठन्ति; पुनः केचन मत्स्याः पलायनार्थं प्लवन्ति, परन्तु पलायितुं न शक्नुवन्ति। पुनः मत्स्यस्य अपरप्रकारः वर्तते, ये जालं छित्वा पलायन्ते। तथा संसारेऽस्मिन् त्रिविधाः जीवाः सन्ति; यथा— बद्धः, मुमुक्षुः मुक्तश्च।

५. मार्गे गच्छन्ती रात्रौ भवति सति आकाशे वात्यालक्षणस्य प्रादुर्भावाद् एका धीवरी मालिगृहे आश्रयं स्वीकृतवती। माली पुष्पगृहे आश्रयं प्रदाय यथाशक्ति सेवां कृतवान्। परन्तु केनापि प्रकारेण तस्याः निद्रा न अभवत्। अन्ते सा अवगच्छति यत्, उद्याने विविधानि पुष्पाणि प्रफुल्लितानि सन्ति, तथा च तेषां पुष्पाणां गन्धात् तस्याः निद्रा न भवति। तदा सा मत्स्यकण्डोले जलं सित्त्वा शिरःसमीपे स्थापयित्वा अस्वपत्। धीवर्याः इव विषयगतजीवेभ्यः अपि जगति दुर्गन्धं विना न किमपि रोचते।

६. यथा शिशुकपोतस्य कण्ठे हस्तः स्थाप्यते चेत् चणकाः गजगजायन्ते। तथा बद्धजीवेन सह सम्भाषणं क्रियते चेत्, तेषाम् अन्तः वर्धमानायाः वासनायाः अनुभवः भवति । तेभ्यः

† बेलुडमठे रामकृष्णसङ्घस्य ब्रह्मचारी।


*dīpaśikhā*/v7/2024/Brahmachari Shubhadip/pp. 40-42

विषयः एव रोचते, धर्मकथा न रोचते।

७. यः मूलकं भुक्तवान्, तस्य उद्गीरणवायुना एव अनुभूयते, तथा यः धार्मिकः तेन सह सम्भाषणं क्रियते चेत्, स केवलं धर्मप्रसङ्गमेव करोति; एवं यः विषयी स विषयकथाम् एव कथयति।

८. मक्षिकाः द्विविधाः— एका मधुमक्षिका, ताः मधुभिन्नं किमपि न भुञ्जन्ति। अपरा मक्षिका मधुनः अपि उपविशति, यदि च जर्जरं व्रणं लभते तर्हि मधु त्यक्त्वा जर्जरव्रणे उपविशति। तद्वत् द्वौ प्रकारकौ जनौ विद्येते— ये ईश्वरानुरागिणः, ते ईश्वरं विना अन्यविषये वक्तुं न शक्नुवन्ति; ये च संसारे आसक्ताः, ते ईश्वरस्य प्रसङ्गं शृण्वन्तः, यदि कश्चित् काम-काञ्चनादिविषये कथयति तर्हि ईश्वरस्य प्रसङ्गं त्यक्त्वा तेन मत्ताः भवन्ति।

९. बद्धजीवः हरिनाम स्वयं न शृणोति, परेषामपि श्रवणं बाधते, धर्मस्य अपि च धार्मिकाणां निन्दां कुर्वन् वर्तते, कश्चित् ध्यानं करोति चेत्, तं बहुधा प्रकारेण उपहसति।

१०. यथा मकरस्य गात्रे शस्त्रेण प्रहारं करोति चेत् शस्त्रं प्रतिनिवर्तते, तत् कथमपि तस्य गात्रं न स्पृशति, तथैव भवन्तः निमीलितजीवस्य समीपे धर्मकथां भूयः प्रचारयन्ति चेदपि तेषाम् आत्मानं सा कथमपि न स्पृशति।

११. सूर्यस्य किरणः सर्वत्र समानरूपेण पतति चेदपि जले, दर्पणे, सर्वेषु स्वच्छवस्तुषु च अधिकं प्रकाशते। ईश्वरस्य विकासः सर्वेषु हृदयेषु समानः भवति चेदपि साधुनां हृदयेषु अधिकं प्रकटितः भवति।

१२. सर्वेषाम् अपूपानाम् त्वचः समानाः भवन्ति चेदपि अन्तःस्थे पूरणे भेदाः सन्ति - केषुचित् नारिकेलपूरणं, अन्येषु क्षीरपूरणम् इत्यादयः। तथैव मनुष्याः सर्वे समानरूपाश्चेदपि गुणभेदेन स्वतन्त्राः भवन्ति।

१३. यद्यपि जलं सर्वं नारायणम्, किन्तु न हि सर्वं पेयम्। ईश्वरः सर्वत्र अस्ति, परन्तु सर्वत्र गन्तुं न शक्यते। यथा कस्मिंश्चिद् जले पादं प्रक्षालयितुं शक्यते, कस्मिंश्चिद् जले मुखं प्रक्षालयितुं शक्यते, किञ्चिद् जलं पातुं वा शक्यते, पुनः किञ्चिद् जलं स्प्रष्टुमपि न शक्यते, तथैव केषुचित् स्थानेषु गन्तुं शक्यते, अपि च केभ्यश्चित् स्थानेभ्यः दूरात् प्रणम्य पलायितव्यम्।

१४. व्याघ्रस्य अन्तः ईश्वरः अस्ति इति सत्यं, परन्तु व्याघ्रस्य सम्मुखं न गन्तव्यम्। दुर्जने अपि ईश्वरः अस्ति इति तु सत्यं, किन्तु दुर्जनस्य सङ्गः न कर्तव्यः।

१५. गुरुः शिष्यम् उपदिश्य “सर्वः पदार्थः एव नारायणः” इति अवोचत्, शिष्यः अपि तथैव अवागच्छत्। एकदा गजः मार्गे आगच्छति स्म, उपरिष्टाद् हस्तिपकः “अपसर” इति अवदत्। शिष्यः चिन्तितवान्, “किमर्थं अहम् अपसरामि? अहम् अपि नारायणः, गजः अपि नारायणः, नारायणस्य समीपे नारायणस्य भयं किमर्थम्?” इति सः न अपसृतवान्। अन्ते गजः तं शुण्डेन उद्धृत्य दूरं क्षिप्तवान्, येन तस्य महती पीडा अभवत्। अनन्तरं सः गुरोः समीपं सर्वं वृत्तान्तं ज्ञापितवान्, तेन गुरुः अवदत् – “साधु उक्तवान् - त्वं नारायणः असि, गजः अपि नारायणः, परन्तु उपरिष्टात् हस्तिपकरूपः नारायणः भवन्तं सावधानं भवतु इति अवदत्,

भवान् हस्तिपकनारायणस्य वार्तां किमर्थं न श्रुतवान्?”

१६. सतः क्रोधं कीदृशं जानासि? यथा जलस्य चिह्नम्। जलेन एकं चिह्नं दीयते चेत् तदैव अन्तर्धानं भवति, तथैव सतः क्रोधः भवति चेदपि तदैव अपगच्छति।

१७. ब्राह्मणगृहे जन्ममात्रेण सर्वे ब्राह्मणाः भवन्ति इति तु सत्यं, किन्तु केचन अतीव पण्डिताः भवन्ति, केचन देवतापूजां कुर्वन्ति, केचन तण्डुलान् पचन्ति, केचन च वेश्याद्वारं गच्छन्ति।

१८. यथा निकषे चिह्नप्रदानमात्रेण सुवर्णं वा पित्तलं वा ज्ञातुं शक्यते, तथैव भगवतः समक्षं सारल्यस्य वा कापट्यस्य वा परीक्षा सम्भवति।

१९. बद्धस्य संसारिणः जनस्य कथमपि चैतन्यं न भवति। जगति दुःखक्लेशं सङ्कटं च प्राप्यापि तेषां चैतन्यं न भवति। यथा उष्ट्रेभ्यः कण्टकतृणभोजनं रोचते, खादन् मुखात् शोणितं धाराप्रवाहवत् प्रवहति, तथापि स कण्टकयुक्तस्य तृणस्य भोजनं न त्यक्ष्यति; तथैव संसारिणः जनाः बहु शोकं दुःखं च प्राप्नुवन्ति, कतिपयेभ्यः दिनेभ्यः परं पुनः यथा आसन् तथैव भवन्ति।